अथ लघ्वमोघानन्दिनी शिक्षाऽऽरभ्यते ॥

पादादौ च पदादौ च सँय्योगावग्रहेषु च ॥ जः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ १ ॥ युक्तेन मनसा तद्वत्तत्त्वा यामि तथाऽपरम् ॥ अनूकाशेन बाह्यं च तुरीयमनुया पदे ॥ २ ॥ पदादावप्यविच्छेदे सँय्योगान्ते च तिष्ठताम् ॥ वर्ज्जयित्वा रहौ यानामीषत्स्पृष्टत्वमिष्यते ॥ ३॥ विद्वद्वदी, न्यमिचाँश्च रोचनाश्च यथा भवेत् ॥ तथा पार्य्याय सूर्य्यश्च मुह्यन्त्वन्ये समूह्यवत् ॥ ४ ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥ ईषत्स्पृष्टो यथा विद्यात्पदच्छेदात्परो भवेत् ॥ ५ ॥ विभाषया यकारश्च नित्यमाम्बेडितेऽपि च ॥ यच्च यच्चेति मा यच्चं तथा येति पदादपि ॥ ६ ॥ अथातऽउत्तरो यः स्यात्तथा नेति पदात्परः ॥ भवन्त्येतेऽपि पूर्वंच तथा च स पदादपि ॥ ७ ॥ अथा वयमादित्यादावथोयेऽअस्य दृश्यते ॥ न यत्परो यथा च स्यात्स पदे तदुदाहृताः ॥ ८ ॥ वो वां वा वै वि वौ पाठे उपसर्गात्परो लघुः ॥ अथ मा स न शब्देभ्यो विभाषाऽऽम्बेडिते यवौ ॥ ९ ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ।

यत्र यत्र विशेषः स्यात्तदिदानीं तु कथ्यते ॥ १० ॥ त्वदर्थवाचिनौ वो वां, वा वै यदि निपातजौ ॥ आदेशाश्च विकल्पार्था ईषत्स्पृष्टाश्च ते स्मृताः ॥ ११ ॥ दे वो वः सविता या वां, व्यातो वेति तथा न तत् ॥ तव व्यायतस्यते तानऽ आवेति कीर्तिताः ॥ १२ ॥ यत्कृतं सूचकारेण तद्वत्स्यात्सम्प्रसारणम् ॥ तज्ज्ञेयं सर्वशाखासु न तु वाजसनेयिनाम् ॥ १३ ॥ लक्षणस्य विरोधेऽपि पाठैक्यं यदि दृश्यते ॥ तत्तथा प्रतिपत्तव्यँय्यञ्चायञ्चा वऽइत्यथ ॥ १४ ॥ अनुस्वारो द्विमात्रः स्याद्वर्णव्यञ्जनोदये ॥ ह्रस्वाद्वा यदि वा दीर्घाद्धेवानार्ठ॰ हृदयेभ्यः ॥ १५ ॥ स ए स्वष्ट्रा सि ए त्यसि सँय्योगे ह्रस्व इष्यते ॥ मध्यम ए मथायेति सँय्योगो न द्विरुच्यते ॥ १६ ॥ ज्ञात्वा वेदविनाशं तु सम्यग् ब्रूयान्न वै बुधः ॥ आकृष्य तं विविक्ते वै तस्य धर्मो न हीयते ॥ १७॥(१) इति श्री लक्ष्मीधानन्दिनो शिक्षा समाप्ता ॥

(१) इदं पद्यं प्राक् शिक्षायां लिखितं तथा ऽपि सम्प्रदायाविदो ऽत्रापि लिखन्त्यतो मया लिखितम् ॥